**DPA – 510 (San)**

**M.A. (Previous) Degree Examination, August/September 2010**
**(Directorate of Distance Education)**
**(Freshers)**
**SANSKRIT (Paper – I)**
**Classical Literature – 1**
**Texts : 1) किरातार्जुनीयम् (I & II Cantos)**
**2) महाश्वेतावृत्तान्तः कादम्बर्याम् ।**

Time : 3 Hours  Max. Marks : 80

***Note** : Answer either in **Sanskrit** or **Kannada** or **English**.*

I. एतेषु पद्यद्वयं विवृणुत । **12**

1) विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगती सुयोधनः ।।

2) असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणं परस्परम् ।।

3) चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ।।

II. भारवेः देशकालादि विषयमधिकृत्य प्रबन्धमेकं रचयत । **12**

**अथवा**

युधिष्ठिरं प्रति भीमः किं अवादीत् ? विशदयत ।

III. अनयोः गद्यभागयोरेकं सानुवादं व्याख्यात । **12**

आसीच्च मम मनसि– 'शान्तात्मनि जने मां निक्षिपता किमिदं अनार्येणासदृशमारब्धं मनसिजेन । एवञ्च नामातिमूढं हृदयमङ्गनाजनस्य यदनुरागविषययोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसाञ्च, क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिस्पन्दितानि नियतमयं मामेवं मकरलाञ्छनेन विडम्ब्यमानामुपहसति मनसा चित्रञ्चेदं यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुम् ।

**अथवा**

यत्तु तत् सोममयूखसंभवमप्सरसां कुलं, तस्मात् किरणजालानुसारगलितेन सकलेनेव रजनिकरकलाकलापलावण्येन निर्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीति नाम्ना हिमकर–किरणावदातवर्णा कन्यका प्रसूता । तां च द्वितीयगन्धर्वकुलाधिपतिः हंसो मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत् ।

P.T.O.